**International Research Journal of Human Resource and Social Sciences**
**ISSN(O): (2349-4085) ISSN(P): (2394-4218)**
**Impact Factor 5.414 Volume 5, Issue 12, December 2018**
**Website**-www.aarf.asia,**Email**:editor@aarf.asia, editoraarf@gmail.com

# रावणसंहितानुसारं पञ्चमभावसमीक्षणम्

**डॉ. विश्वरञ्जनपति**

*सहाचार्यः*

*ज्योतिषविभागः, विभागाध्यक्षः*

*केन्द्रीयसंस्कृतविश्वविद्यालयः*

*श्रीसदाशिवपरिसरः, पुरी*

मानवजीवनमतीवदुर्लभम्। बहुजन्मनः तपः प्रभावात् कदाचित् जीवः मनुष्यजन्म लभते। चतुरशीतिलक्षयोनिषु मानवजीवनं श्रेष्ठतरं मूल्यवत्तरं चेति विचारयन्ति विपश्चितः। तदपि जीवनं गुरुसान्निध्यात् पल्लवितं श्रेयप्रेययशसान्वितं च जायते। गुरवः सन्ति मानवजीवनस्य पथप्रदर्शकाः। गुरुणा विना न कोऽपि जनः स्वयं सम्पूर्णः यशस्वी च भवेत् एतदर्थं श्रीमद्भागवत-महापुराणे नवयोगेश्वरसम्बादे उक्तमस्ति -

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम्।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् [१] ।।

दुर्लभमेतद् मानुषजन्म शतवर्षात्मकञ्चास्ति। वेदाः ''जीवेमः शरदः शतम्'' कुर्वन्नेवेहकर्माणि जीजीविषे शतं समाः इति प्रवदन्तः मानवजीवनं शतवर्षात्मकमिति स्वीकुर्वन्ति। पुनश्च शतवर्षात्मकमेतद् जीवनं शास्त्रकाराः चतुर्द्धाविभाजयन्ति तद् विभाजनं यथा - ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, सन्यासाश्रमश्च। एतेषु चतुर्विधेष्वाश्रमेषु, गृहस्थाश्रमः सर्वतोऽधिकः श्रेयस्करः। यतो हि इममेवाश्रममाश्रित्य अन्ये आश्रमाः जीवन्ति। तदुक्तं शास्त्रकारैः -

**© Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

सानन्दं सदनं सुताश्च सुधीयः कान्ता न दुर्भाषिणी।

सन्मित्रं सुधनं स्वयोषिति रतिश्चाज्ञापराः सेवकाः।

आतिथ्यं शिवपूजनं प्रतिदिनं मृष्टान्नपानं गृहे ।

साधोसंगमुपासते हि सततं धन्योगृहस्थाश्रमः[२] ।।

अर्थात् यस्मिन् गृहे सुताः न सन्ति कान्ता दुर्भाषिणी वर्तते तद् गृहं सुखदायकं न भवति अपि तु यत्र शिशवः क्रीडनरताः स्त्रियः प्रियभाषिण्यः सन्ति तद् गृहमतीव सुखदायकं सुन्दरं च भवेत्। यस्मिन् प्रतिदिनम् अतिथिसेवा शिवपूजनं मृष्टान्नपानं च भवति तद् गृहमेव गृहमिति वदन्ति। तत्रस्थ गृहस्थः सर्वेषां मानवीयमूल्यबोधानां रत्नाकरः इति वक्तुं शक्यते। गृहस्थाश्रमः यद्यपि श्रेयस्करः तथापि तत्र पुत्रावाप्तिः सर्वतोऽधिकः श्रेयस्करः इति आलोचयन्ति। सान्वयाः पितरः यथा समाजे आदृताः भवन्ति न तथैव प्रजाहीनाः अतः स्मृतिकारेण मनुना प्रोक्तं - पुत्रार्थं क्रियते भार्या इति। श्रीमद्भागवतकारोऽपि गृहाश्रमस्य महत्त्वं प्रतिपादयन् इत्थं प्रतिपादयति -

गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सिताम्।

यवीयसीं तु वयसा तां सवर्णामनुक्रमात् [३] ।।

गृहाश्रमः केवलं पुत्रोत्पादनाय स्ववंशस्य रक्षणाय अन्येषामाश्रमिणां च यथाविधिः परिपोषणाय क्रियते न तु इन्द्रियतृप्तये। अतः वैवाहिके कर्मणि आदौ कन्यकायाः पुंसः अपि पुत्रोत्पादन-सामर्थ्यं विचार्यते। पुत्रकन्यकाभिः विना गृहाश्रमाचरणं निष्फलम् - यतो हि उक्तमस्ति -

धिग्जीवितं प्रजाहीनं धिग् गृहं च प्रजां विना।

धिग्धनं चानपत्यस्य धिक्कूलं सन्ततिं विना[४] ।।

तथाहि अनपत्यस्य सर्वाणि कार्याणि कथं निष्फलानि भवन्ति तद्वर्णयन्ति शास्त्रकाराः इत्थम् -

किं व्रवीमि ऋषे दुःखं पूर्वपापेन संचितम्।

मदीयाः पूर्वजास्तोयं कवोष्णमुपभुञ्जते।।

मद्दत्तं नैव गृहणन्ति प्रीत्या देवा द्विजातयः।

© Associated Asia Research Foundation (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

प्रजादु:खेन शून्योऽहं प्राणांरस्त्यक्तुमिहागतः[५]।।

पुत्रस्यावश्यकतां तन्महत्वं च विचार्य वैवाहिके कर्मणि आदौ अनपत्ययोगः विचार्यते। तदुक्तं शास्त्रकारैः –

पञ्चपाणिग्रहे दोषाः वर्जनीयाः विशेषतः।

दारिद्र्यं कुलटामृत्युः बैधव्यमनपत्यता ।।

ज्योतिःशास्त्रानुसारमनपत्ययोगः जन्मकुण्डल्याः पञ्चमभावात् विचार्यते। पञ्चमभावस्य शुभाशुभत्वं बलाबलत्वं च विचार्य भावि दम्पत्योः पुत्रकन्यकाः कथं भवेयुः तत् निर्द्धारयन्ति। जन्मकुण्डल्यां द्वादशभावाः भवन्ति ते यथा -

तनुर्धनं च सहजबन्धुपुत्ररिपुरस्तथा।

पत्नी निधनं धर्मश्च कर्मचायोव्ययोऽपि च।।

पञ्चमभावः पुत्रकन्याकादीनां भावेति विचारयन्ति।

**पञ्चमभावात् विचारणीयविषयाः**

पञ्चमभावात् किं चिन्तनीयमिति शंकायां जातकपारिजातकारः तस्य कारकत्वमित्थं निरूपयति - तद्यथा

पुत्राद्देवमहीपपुत्रपितृधीपुण्यानि संचिन्तये-

द्यात्रामसुस्तुतस्वकर्मभवनैर्दुराटनं रिष्फतः।।

लग्नाद्बन्धुदीनेशतः पितृसुखं जीवात्मजस्थानतः।

पुत्रप्राप्तिरनङ्गबित्तपसितैः स्त्रीसम्पदश्चिन्तयेत्[६]।।

एवमपि ज्योतिः शास्त्रमूर्द्धन्यं जातकाभरणं पञ्चमभावात् बुद्धिप्रबन्ध-सन्तान-मन्त्र-गर्भ-नीत्यादीनां विचारः करणीयः इत्यपि विवृणोति। तदुक्तमस्ति तत्र -

बृद्धिप्रबन्धात्मजमन्त्रविद्याविनेयगर्भस्थितिनीतिसंस्थाः।

© Associated Asia Research Foundation (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

सुताभिधाने भवने नराणां होरागमज्ञैः परिचिन्तनीयम्[७] ।।

**रावणसंहितायाः परिचयः -**

भारतीयज्योतिश्शास्त्रं बहुप्राचीनकालात् अस्माकं परम्परायां वेदवत् प्रतिष्ठितमस्ति। एतत् शास्त्रं वेदपुरुषस्य चक्षुस्थानीयमिति स्वीकुर्वन्ति शास्त्रकाराः। ज्योतिश्शास्त्रपरम्परायां नैके ग्रन्थाः विविधाश्च संहिताः विलोक्यन्ते। तासु संहितासु लंकाधिपतिरावणेन विरचिता रावणसंहिता अन्यतमा। रावणेन प्राणीतत्वात् इमां संहितां रावणसंहिता इति उच्यते। अस्यां संहितायां षड्तरंगाः बिलोक्यन्ते। तेषु प्रथमे लंकाधिपस्य रावणस्य जन्मवृतं, तस्य वंशपरिचयः दिग्विजयः वेदवती अनरण्यशापेत्यादयः विषयाः वर्णिताः सन्ति। द्वितीये तरङ्गे शिवोपासना तस्याः प्रकारभेदाश्च निरूपिताः सन्ति। अयं दशाननः प्रख्यातशिवभक्तः आसीत् तदर्थं शिवोपासनाविषयाः अत्र विशेषरूपेण व्याख्याताः सन्ति। तृतीयतरङ्गे योगसाधनविषयाः निरूपिताः सन्ति। हठयोगप्रशंसा सप्तसाधनानि, सिद्धासनस्वरूपं विविधाः यौगिकी मुद्राः प्राणायामाश्चात्र विशेषरूपेण वर्णिताः सन्ति। अष्टांगयोगसाधनस्यापि विशेषवर्णनमत्र प्रतिपादितमस्ति। चतुर्थतरङ्गे तन्त्रशास्त्रविषयाः चर्चिताः सन्ति विविधानां मारणमोहनस्तम्भनोच्चाटनादीनां मन्त्राणां संकलनमत्र कृतमस्ति। लोकोपकारकाणां यन्त्राणां मन्त्राणां विविधानां तान्त्रिकसाधनानां सम्यगुपस्थापनमस्य तरङ्गस्य महत्वैशिष्ट्यं विवृणोति। पञ्चमतरंगः चिकित्सातरङ्गेति कथ्यते। प्रसङ्गेऽस्मिन् विविधानामर्काणाम् औषधीनां च गुणाः साधुवर्णिताः सन्ति। द्रव्यगुणनिरूपणं ततः तिक्त-अम्ल इत्यादीनां षड्रसाणां स्वरूपप्रतिपादनं औषधसेवनविधिः निर्माणविधिश्च अत्र सम्यक् निरूपितोऽस्ति। ज्योतिश्शास्त्रविषयाः षष्ठतरङ्गे उपलभ्यन्ते। प्रसङ्गानुसारमस्मिन् ग्रन्थे ज्योतिश्शास्त्ररचारम्भकालः प्रतिपाद्यविषयाः, अस्य शास्त्रस्य स्वरूपं महत्वं च सम्यक् विचारितं वर्तते। जीवस्य पुनर्जन्मकारणानि कर्मभेदाः, दैवज्ञदिनचर्या प्रश्नकर्त्तुः इति कर्त्तव्यता अत्र वर्णिताः सन्ति। प्रश्नज्योतिषस्य विविधाः विषयाः शकुनं तस्य आधारः प्रश्नोपकरणविचारः इत्यादिविषयाः अपि सांगोपांगरूपेण वर्णिताः सन्ति। लग्नादीनां द्वादशभावानामपि

© Associated Asia Research Foundation (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

विचारः अस्मिन् अति विपुलभावेन विलोक्यते तेषु पञ्चमभावस्य विचारः मनोरमः अस्ति। एवं षट्तरंगेषु विविधाः विषयाः विशद्तया अत्र आलोचिताः सन्ति।

**पञ्चमभावविचारः**

यद्यपि जन्मकुण्डल्यां जातकस्य पञ्चमभावात् विविधाः विषया विचारिताः भवन्ति तथापि पुत्रभावः एव प्रधानविषयः भवति। यतो हि मानवजीवनं फलीभूतं तदा एव जायते यदा सः कयापि कन्यकया सह विवाह्य स्ववशं यदि बर्द्धयति। अस्माकं परम्परायां यदि कश्चन अपुत्रिकः तिष्ठति तर्हि तस्य स्वर्गस्थाः अपि पितरः तत्र रूदन्ति तस्मादुच्यते पुत्रार्थं क्रियते भार्याः। दार परिग्रहः पुत्रार्थमेव यदि विवाहात् परं सन्तानोत्पत्तिः न भवति चेत् तस्य सर्वाणि ऐहिकामुस्मिककर्माणि निष्फलानि भवन्ति इति विचारयन्ति शास्त्रकाराः। प्रत्येकस्य मानवस्य विवाहात् परं पुत्रकन्यकाः भविष्यन्ति न वा तदपि जन्मकुण्डल्याः ज्ञातुं शक्यते। एतस्मिन् विषये ज्योतिर्विदं नैकानि मतानि विलोक्यन्ते इयं रावणसंहिता अपि विषयेऽस्मिन् स्वकीयं विशिष्टमतमुपस्थापयति।

**प्रथमसन्तानयोगः -**

प्रश्नकर्त्तारः अस्याः नार्याः गभिण्याः आदौ पुत्रः अथवा कन्यका भवेदिति दैवज्ञस्य सम्मुखे प्रश्नं समुपस्थापयन्ति। तदा दैवज्ञेन किं करणीयं तन्मया विचार्यते। जातकाभरणानुसारं यदि कस्यापि जन्मकुण्डल्यां लग्नेशः प्रथमद्वितीयतृतीयभावे भवेत् तदा तस्यादौ पुत्रो भवेदिति चिन्तनीयं सोऽपि यदा चतुर्थे तिष्ठेत् तदा द्वितीयगर्भेपुत्रोभवेदिति वदेत्। कस्यापि पुंसः स्त्रियाः वा पञ्चमभावे शुभग्रहाः भवेयुः उतः तेषां दृष्टिः तत्र स्यात् तर्हि तस्य निश्चितरूपेण सन्तानाः भवेयुः अत्र उपलक्षणेन पञ्चमेशस्यापि ग्रहणं भवेत्। पुनश्च यदि शुक्रचन्द्रमंगलाः मिथुन-कन्यामीनराशिषु भवेयुः तदा प्रश्नकर्तुः आदौ पुत्रः भवेत् एते एव ग्रहाः यदा धनुराशौ भवेत् तदा तस्य सन्तानहानिः भवेदीति वदेत्। तदुक्तं जातकाभरणे -

लग्ने द्वितीये यदि वा तृतीये विलग्ननाथे प्रथमः सुतः स्यात्।
तुर्येस्थितेऽस्मिश्च सुतो द्वितीयः पुत्री सुतो वेति पुरः प्रकल्प्यम्।।
सुताभिधानं भवनं शुभानां शुभेन दृष्टं सहितं विलोक्य।

© Associated Asia Research Foundation (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

सन्तानयोगं प्रवदेन्मनीषी विपर्ययत्वे हि विपर्ययः स्यात्।।

द्विदेहसंस्थाभृगुभौमचन्द्राः सन्तानमादौजनयन्ति पुत्रम् ।

एते पुनः धन्वीगताः न कुर्युः पश्चात्तथादौ गदितमहद्भिः[८]।।

पुत्रस्थानगते भौमे मेषसिंहालिमीनगे।

जीवदृष्टियुते वापि पुत्रावाप्तिविनिर्दिशेत्[९]।।

अर्थात् यदि कस्यापि कुण्डल्यां पञ्चमभावः मेषसिंहवृश्चिकमीनराशौ भवति तत्र शुभग्रहाणां दृष्टिः यदि स्यात् अथवा गुरुदृष्टः मंगलः यदि तत्र भवेत् तर्हि तस्य आदौ पुत्र भवेदिति वक्तव्यम्। द्वयोः शुभग्रहयोः मध्ये यदि कस्यापि जन्मनः पञ्चमभावः भवति सोऽपि पञ्चमेशेन दृष्टः अन्वितः तिष्ठति चेत् तदा पुत्र भवेदिति चिन्तनीयम्। द्वादशाष्टमषष्ठभावं विहाय यदि पञ्चमेशः अन्यत्र बलवत् तिष्ठति यदा पुत्रः भवेदिति वक्तव्यम् -

सुतभे शुभमध्यस्थे शुभदृष्टियुतेऽथवा।

सुतभेशयुते दृष्टे सुतावाप्तिं विनिर्दिशेत् ।।

सुतेशे रिफरन्ध्रारिभावादन्यत्र संस्थिते।

बलयुक्ते शुभैदृष्टे सुतावाप्तिं विनिर्दिशेत्[१०]।।

**बहुकन्यायोगः -**

पुरुषाः पुत्रप्राप्त्यर्थं कदाचित् बहुकन्यकाः जनयन्ति। कन्यकान् दृष्ट्वा कदाचित् पितरः शान्ताः अवसन्नाः दुःखिताश्च भवन्ति। यतोहि शास्त्रकाराः इत्थम् अभिप्रयन्ति -

कन्येति जाता महती हि चिन्ता

कस्मै प्रदेयेति महान् वितर्कः।

दत्त्वा सुखं लप्स्यते वा न वेति

कन्या पितृत्वं खलुनाम कष्टम्[११]।। (हितोपदेशः)

© Associated Asia Research Foundation (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

कस्यापि जातकस्य पञ्चमस्थाने स्त्रीग्रहा: बलयुता: तिष्ठन्ति चेत् तदा जातकस्य कन्यका: भवन्ति यदि तत्र पुरुषग्रहा: तिष्ठन्ति चेत् पुत्रा: भवितुमर्हति।

लग्नेशे पुत्रभावस्थे पुत्रेशे बलसंयुते।

परिपूर्णबलेजीवे पुत्रप्राप्तिर्नशंसय:।।

यत्र पञ्चमाधिप: चन्द्रशुक्रादय: स्त्रीराशौ भवन्ति अथवा स्त्रीराशे: नवमांशे तिष्ठन्ति तदा तस्य बहुकन्यका: भवेयु: इति दैवज्ञेन वक्तव्यम्। तदुक्तमस्ति संहितायाम् -

सुतेशशशिशुक्रेषु स्त्रीराश्यंशमतेषु च ।

तथैव कन्यकालाभं प्रवदेन्मतिमान्नर:[१२] ।।

जातकालंकारस्य मतानुसारं यदि पञ्चमे कुम्भराशौ शनैश्चर: भवेत् तदा पंचपुत्रा: भवेदिति वक्तव्यं सोऽपि मकरे भवेत् चेत् तदा तिस्त्र: कन्यका: भविष्यन्ति इति चिन्तनीयम् - तदुक्तम् -

कुम्भे चेत् पञ्चपुत्रास्तदनु च मकरे नन्दने प्यात्मजास्यु:।

**सन्तानसंख्यानिरूपणम् -**

जीवात्पञ्चमस्थानात् ज्ञानपुत्रधनादिविचार: कार्य: अष्टकवर्गेऽपि गुरो: पञ्चमस्थाने यावन्त्य: रेखा: भवन्ति (नीचस्थ शत्रुक्षेत्रगतगुरुं विहाय) तावत् संख्यका: पुत्रा: कन्यका: वा भवितुमर्हन्ति इति वक्तव्यम् । यदि गुरो: तत्स्थानं परमोच्चस्थानं भवेत् तदा गुणाधिका: सन्ताना: भवितुमर्हन्ति। तदुक्तम् -

जीवात् पञ्चमतो ज्ञानं पुत्र धर्मधनादिकम्।

गुरोरष्टकवर्गेषु सन्तानमपि कल्पयेत् ।।

गुरुस्थितात् सुतस्थाने यावन्तो विद्यते फलम्।

शत्रुनीच गृहं त्यक्त्वा तावद् वृयादपत्यकम् ।।

**© Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

जातकाभरणानुसारं पञ्चमभावं प्रति यावन्मितानां पुरुषग्रहाणां दृष्टिरस्ति तावत् संख्यकाः पुत्राः यावत् संख्यकानां स्त्रीग्रहाणां दृष्टि:भवति तावत् संख्यकानां कन्यकानां जन्म भवति इति तत्र निर्दिष्टमस्ति। तदुक्तम् -

सन्तानभावे गगने चराणां यवन्मितानामिहदृष्टिरस्ति।

स्यात्सन्ततिस्तत्प्रमिता नृसंज्ञैर्नराश्च कन्याः प्रमदाभिधानैः[१३]।।

पञ्चमभावः यस्मिन्नवांशे भवति तद्राशिसंख्यकाः सन्तानाः भवन्ति इति कस्यापि आचार्यस्य मतं भवति।

**कठिनतायां पुत्रप्राप्तियोगः -**

यदि कस्यापि पुंसः द्वितीयद्वादशभावयो स्त्रीकारकग्रहाणां दृष्टिः युतिः वा भवति लग्ने अन्यपुरुषग्रहः स्त्रीकारकग्रहमध्येतिष्ठति चेत् पुनश्च लग्नः वृश्चिक अथवा सिंहराशौ भवेत् पुनश्च अग्नितत्त्वराशिषु मेषसिंहधनुषु यदा सुतभावः भवति तदा बहुकाष्टेन पुत्रकन्यकाः भविष्यन्तीति वक्तव्यम् -

छाद्यछादकयोस्त्रीत्वे पुंस्त्वे वा वृषयोषितोः।

अलिकेसरिणोश्चापि चन्द्रलग्नादिसंगमे ।

वह्निभूतोदयेवापि पुत्रलब्धिसुदुर्लभा[१४] ।।

**दत्तकपुत्रयोगः**

कयोः स्त्रीपुंसोः सन्तानाः न भवन्ति चेत् तदा कालान्तरे तौ दत्तकपुत्रौ स्वीकुरुतः। अयमपि कश्चन योगः यत्र दम्पती कस्यापि पुत्रं स्वपुत्ररूपेण स्वीकुर्वन्ति। अयं योगः ज्योतिः शास्त्रोक्तविधिना दत्तकयोगः इति कथ्यते। रावणसंहितानुसारं यदि जन्मकुण्डल्यां पञ्चमस्थानेः शनिबुधयोः राशिः स्यात्

© **Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

तत् स्थानं यदि शनिगुलिकेन च दृष्टं भवति चेत् तदा दत्तकयोगः इति वदेत्। पुनश्च यदि पूर्णवली शुभग्रहः पंचमे तिष्ठति सोऽपि पंचमेशेनादृष्टः स्यात् तदा दत्तकपुत्रयोगः इति वक्तव्यं दैवज्ञेन ।

पुत्रस्थाने बुधक्षेत्रे मन्दक्षेत्रेऽथवा मति।
मन्दमान्दियुते दृष्टे तदा दत्तादयस्सुताः।।
सम्पूर्णबलसंयुक्तः पुत्रस्थानगतः शुभः।
अदृष्टः पुत्रनाथेन तदा दत्तादयः सुताः[१५]।।

जातकाभरणस्य मतानुसारं कुम्भमकरराशौ यदि पञ्चमभावः भवति तत्रापि शनिचन्द्रमसोः, दृष्टिः अथवा एकस्यापि योगः भवति चेत् तदा दत्तकपुत्रयोगः भवितुमर्हति। पुनश्च यदि तत्र बुधस्य दृष्टिः भवेत् तदा क्रीतपुत्रः तस्य भवेदिति वाच्यम्।

मन्दस्य राशिसुतभावसंस्थौ मन्देन युक्तो शशिनेक्षितश्च।
दत्तात्मजाप्तिः शशिवद्बुधेऽपि क्रीतः सुतस्तस्य नरस्य वाच्यः[१६]।।

**सन्तानाभावकारणानि** -

शिववचनमिदं संहितायामस्यां निगदितमस्ति यत् यदि पञ्चमस्थाने राहुणादृष्टः युतो वा पञ्चमेशः तिष्ठति शुभग्रहाणां दृष्टिः न भवति चेत् तदा सर्पशापात् पुत्रः न भवेदिति वक्तव्यम्। यदि लग्ने त्रिकोणे वा गुलिकयुक्तः शुभदृष्टिवर्जितः शनिः तिष्ठति चेत् तदा पितृशापात् पुत्राभावः जायते। एवं प्रकारेण संहितायामस्यां पञ्चमभावस्य विस्तृता चर्चा विलोक्यते। ऋषिप्रणीतैः शास्त्रैः सार्द्धमस्याः संहितायाः अपि प्रामाणिकता स्वीकर्तुं शक्यते। ज्योतिर्विदां समाजे यथा अन्यासां संहितानां गौरवं सातिशयं भवति तथैव प्राचीनकालाद् अस्यापि गौरवं भारतीयसमाजे वरीवर्तते इति दिक्।

**टिप्पणी -**

१. श्रीमद्भा.म.पु.
२. सुभाषितरत्नभाण्डागारम्, पृ.८९
३. श्रीमद्भा. ११/१७/३९
४. श्रीमद्भा. माहात्म्यम्, ४/२९
५. श्रीमद्भा. माहात्म्य, ४/२७-२८
६. जातकपारिजात: पंचमभाव फ. श्लो.१
७. जातकाभरणम्, प.भावविचार:
८. जातकाभरण प.भा.वि.,२-४
९. रावणसं ६/तरङ्ग
१०. रावणसं. षष्ठतरंग:
११. हितोपदेश:
१२. रावण संहिता
१३. जातका भ. पञ्चमभाव वि.५
१४. रावणसंहिता षष्ठतरंग
१५. रावण सं. षष्ठ
१६. जातकाभरणम्, पञ्चम १२

●●●

© Associated Asia Research Foundation (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.